**पुराकथा** स्त्री पुरा प्राचीना कथा। इतिहासे भाग० १।१३।४६

**पुराकल्प** पु० पुरा पुराणः कल्पः। प्राचीने कल्पे मनुः ६। २२श्लो०। "स्तुतिर्निन्दापुराकृतिपुराकल्पः" इत्यर्थवाद गौ०१।२।६०उक्ते २अर्थवादभेदे। अर्थवादशब्दे ३६६ पृ० उदा० दृश्यम्।

**पुराकृत** त्रि० पुरा पूर्वं कृतम्। पूर्वकृते इह जन्मनि जन्मान्तरे कृते पापपुण्यादौ "अकाले दर्शनं विष्णो-र्हन्ति पुण्यं पुराकृतम्" स्मृतिः। प्रारब्धकर्मणस्तु भोगादेव क्षयो न तेषां केनापि नाश्यतेति सिद्धान्तः।

**पुराग** त्रि० पुरा गच्छति गम–ड। पूर्वगामिनि ततः कृशा-श्वा०चतुरर्थ्यां०छण्। पौरागीय तत्सन्निकृष्टदेशादौ त्रि०

**पुराण** व्याख्याने कण्ड्वादेराकृतिगणत्वात् यक् पर० सक० सेट्। पुराण्यति अपुराणीत्।

**पुराण** त्रि० पुरा भवः ट्यु नि० तुट् न, पुरा नीयते नी ड वा पूर्व०णत्वम्। १पुराभवे "सर्गश्च प्रतिसर्गश्च वंशोमन्व-न्तराणि च। वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम्" इत्युक्तलक्षणे व्यासादिप्रणीते २शास्त्रभेदे न०।

तच्च द्विविधं महापुराणोपपुराणभेदात् तत्र उपपुराण-शब्दे तद्भेदादिकमुक्तं महापुराणं च दशलक्षणकम् "सर्गोऽस्याथ विसर्गश्च वृत्ती रक्षान्तराणि च। वंशो-वंशानुचरितं संस्था हेतुरपाश्रयः। दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः। केचित् पञ्चविधं ब्रह्मन्! मह-दल्पव्यवस्थया। अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः। भूतसूक्ष्मेन्द्रियार्थानां सम्भवः सर्ग उच्यते। पुरुषानु-गृहीतानामेतेषां वासनामयः। विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम्। वृत्तिर्भूतानि भूतानां चराणा-मचराणि च। कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा। रक्षाच्युतावतारेहा विश्वस्यानुयुगे युगे। तिर्य्यङ्-मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः। मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः। ऋषयोंऽशावताराश्च हरेः षड्-विधमुच्यते। राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽ-न्वयः। वंशानुचरितं तेषां वृत्तं वंशधराश्च ये। नैमि-त्तिकः प्राकृतिको नित्य आत्यन्तिको लयः। संस्थेति कविभिः प्रोक्तश्चतुर्धास्य स्वभावतः। हेतुर्जीवोऽस्य सर्गा-देरविद्याकर्मकारकः। यं चानुशयिनं प्राहुरव्याकृत-मुतापरे। व्यतिरेकान्वयौ यस्य जाग्रत्स्वप्नसुषुप्तिषु। मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः। पदार्थेषु तथा द्रव्यं तन्मात्रं रूपनामसु। बीजादिपञ्चतान्तासु ह्यवस्थासु युतायुतम्" भाग०१२।७अ०। तच्चाष्टादशविधम्। विष्णुपुराणे तद्भेदा उक्ता यथा

"अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते। ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा। तथान्यन्नारदीयञ्च मार्क-ण्डेयञ्च सप्तमम्। आग्नेयमष्टमञ्चैव भविष्यं नवमं स्मृ-तम्। दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम्। वा-राहं द्वादशञ्चैव स्कान्दञ्चैव त्रयोदशम्। चतुर्दशं वामनञ्च कौर्म्मं पञ्चदशं स्मृतम्। मात्स्यञ्च गारुडञ्चैव ब्रह्माण्डञ्च ततःपरम्"। हेमाद्रि० व्र० उक्तं तेषां श्लोकसंख्यादि तत्तत्पुराणशब्दे दृश्यम्। तेषां तामस-त्वादिभेदाः पद्मपु० उत्तरख० ४३अ० दर्शिता यथा "मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दं तथैव च। आग्नेयञ्च षडेतानि तामसानि निबोधत"। "वैष्णवं नारदीयञ्च तथा भागवतं शुभम्। गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने!। सात्त्विकानि पुराणानि विज्ञे-यानि शुभानि वै"। "ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च। भविष्यं वामनं ब्राह्मं राजसानि निबोधत। सात्त्विका मोक्षदा देवि! निर्वाणप्राप्तिहेतवः"। अशीति वराटकमिते ३पणे ४कार्षापणे च पु०न० शब्दरत्ना०।

**पुराणग** पु० पुराणैः गीयते गै–घञर्थे क, पुराणं गायति गै–क वा।१ब्रह्मणि परात्मनि हेमच०२पुराणगायके त्रि०।

**पुराणपुरुष** पु० पुराणैकरूपस्तुल्यः पुरुषः शाक०त० कर्म० वा। १विष्णौ २वृद्धे पुरुषे च त्रिका०।

**पुराणान्त** पु० पुराणान् पुरातनान् अन्तयति अन्त+णिच्–अण् उप०स०। १यमे हेमकरः। द्वित०। २पुराणभेदे च

**पुरातन** त्रि० पुराभवः पुरा+ट्यु–तुट् च। १पुराभवे अमरः स्त्रियां ङीप्। २विष्णौ पु० "ज्ञानगम्यः पुरातनः" विष्णुस०। "कालेनापरिच्छिन्नत्वात् पुराऽपि भवतीति पुरातनः"भा०। [देहाधिगे जीवे पुरञ्जनशब्दे दृश्यम्

**पुराधिप** पु० ६त०। १नगराधिपे। पुराध्यक्षादयोऽप्यत्र।

**पुरायोनि** पु० पुरा प्राचीना योनिरस्य महादेवे। "पुरा-योनिर्युधाजिच्च अभिया सुदितो भवः" भा०व०१८८अ०।

**पुराराति** पु० ६त०। त्रिपुरभेदके शिवे पुरारिप्रभृतयोऽपि

**पुरार्द्धविस्तार** पु० पुरा प्राग्वर्त्ती अर्द्धविस्तारोऽस्य। १खेटके २अस्त्रभेदे हेमच०।

**पुरावती** स्त्री नदीभेदे भा०भी० ६अ०।

**पुरावसु** पु० पुरा पूर्वं वसुः। वसुभेदांशजाते भीष्मे त्रिका०।